Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 1 | ISSN : 2582-0095

# सस्कृत भाषायां शिक्षणमहत्त्वम्



**डॉ. पवन कुमारः,**

**सहायकाचार्यः,**

**राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः, भोपालम्**

**सारांशः**

आचार्यदेवो भव इति अभियुक्तोक्तिः आचार्यस्य देवत्वं प्रतिपादयति। प्रतिष्ठितः आचार्यः स्वशिष्यान् विद्याबलेन योग्यं कुरुते। स एव आचार्यः सम्मानितः भवति यः ज्ञानेन सह उत्तमः सम्प्रेषकः भवति। सम्प्रेषणञ्च शिक्षणस्य प्राणाः। यथा प्राणत्वाभावे जीवनाभावः, तथैव सम्प्रेषणाभावे शिक्षणाभावः। शिक्षणस्य सम्पूर्णफलप्राप्त्यर्थम् उत्तमं सम्प्रेषणं भवेत्। सम्प्रेषणेऽपि सम्प्रेषणप्रक्रियायाः महत्त्वं वरीवर्ति। प्रभावशालिसम्प्रेषणस्य सिद्धान्ताः सम्प्रेषणं वैज्ञानिकरीत्या निरूपयन्ति। तेनैव सह उत्तमसम्प्रेषणे कानिचन बाधकतत्त्वानि अपि लक्ष्यीक्रियन्ते। सम्प्रेषणे कानिचन महत्त्वपूर्णानि प्रतिमानानि अपि दरीदृश्यन्ते, येषां प्रयोगैः उत्तमं प्रभावोत्पादकञ्च सम्प्रेषणं भवितुमर्हति। नैकैः माध्यमैः सम्प्रेषणं जायते। शिक्षकस्यापि इदं प्रमुखं दायित्वं भवति यत् सः उत्तमतया विषयस्य सम्प्रेषणं कुर्यात्। आवश्यकतायां सत्यामपेक्षितानि परिवर्तनानि समासाद्य छात्राधिगमः उत्तमतया यथा जायेत तदर्थं प्रत्यहं प्रयासरतः भवेत्। तदीयैः यत्नैः कक्ष्यायां शिक्षणेन सह अनुशासनमपि समानेतुं शक्यते। विषयस्यावगमनाभावे एव अधिगमेन सह अनुशासनमपि कक्ष्यासु बाधितं भवति। अतः शिक्षणे सम्प्रेषणस्य महत्त्वं वास्तविकरूपेण प्रतिबिम्बितंदृश्यते।

**मुख्यशब्दाः** – शिक्षणम्, सम्प्रेषणम्, सम्प्रेषणप्रक्रिया।

**शोधपत्रोद्देश्यानि–**

1. शिक्षणस्य सम्प्रत्यस्य प्रतिपादनम्।
2. सम्प्रेषणस्य विशदतया परिचयः।
3. शिक्षणे सम्प्रेषणस्य भूमिकायाः विस्तरेण निरूपणम्।

**उपक्रमः**

शिक्षायां विद्यमानेषु महत्त्वपूर्णविषयेषु 'शिक्षणम्' सुतरां विशिष्टं स्थानं निर्वहति। औपचारिकशिक्षासन्दर्भे शिक्षणसंस्थासु आरम्भतः शिक्षणमेव दृष्टिपथमायाति। शिक्षणाधिगमप्रक्रियायामपि शिक्षणस्य स्थानं विशिष्टमेव। क्वचिच्च अधिगमस्य निर्धारकत्वेऽपि शिक्षणं महत्त्वपूर्णम्। अर्थात् अधिगमः जातः नवेति इत्यत्रापि तत्कारणं शिक्षणमेव इति विदुषां मतम्। शिक्षणस्य प्रभावोपादकतायाः सम्वर्धने नैके प्रयासाः विहिताः। शैक्षिकप्रविधिः अपि अत्रैव अन्तर्भवति। महाकविकालिदासस्य पङ्क्तिरियं सुप्रसिद्धा–

**श्लिष्टा क्रिया कस्यचिदात्मसंस्था**
**सङ्क्रान्तिरन्यस्य विशेषयुक्ता।**
**यस्योभयं साधु स शिक्षकाणां**
**धुरि प्रतिष्ठापयितव्य एव।।**

श्लोकेऽस्मिन् कवेः आशयः शिक्षकाणां कृते नियमाकः भवितुमर्हति। यतः न केवलं वैदुष्यं न वा केवलं सङ्णक्रान्तिः अर्थात् सम्प्रेषणम् महत्त्वपूर्णमपितु उभयं यस्य साधुः स एव प्रतिष्ठापितः भवति। अतः शिक्षणेन सह सम्प्रेषणं महत्त्वपूर्णमेव। शिक्षणस्य सम्पूर्णं फलं सम्प्राप्तुं सम्प्रेषणं विधिवत् अपेक्षानुगुणञ्च भवेदित्यत्र नास्ति संशीतिः।

**(1) शिक्षणं नाम किम्–**

शिक्षायां शिक्षकस्य, छात्रस्य, पाठ्यक्रमस्य च न केवलं महत्त्वपूर्णं स्थानमस्ति, प्रत्युत परस्परं घनिष्ठः सम्बन्धः अपि विद्यते। सम्बन्धस्यास्य निर्वहणं करोति शिक्षणम्। शिक्षणमाध्यमेन अध्यापकस्य छात्रस्य च मध्ये पारस्परिकक्रिया पाठ्यक्रमाधारेण जायते। सङ्कुचितार्थे शिक्षणं कक्ष्यासु सम्पाद्यते। एवमेव व्यापकार्थे तु शिक्षणम् आजीवनं प्रचलति। अत एव उक्तम् 'यावज्जीवनमधीते विप्रः' इति।

शिक्षणस्य स्फुटप्रतिपत्तिनिमित्तं काश्चन परिभाषाः उल्लिख्यन्ते। तद्यथा–

1- B. O. Smithमहोदयेनोक्तम् –Teaching is a system of actions intended to induce learning.
2- Edmund Amidon (1967) वर्येण प्रतिपादितम्–Teaching is an interactive process primarily involving classroom talk which takes place between teacher and people and occurs definable activities.
3- N.L. Gage (1962)- Teaching is a form of inner-personal influence aimed at changing, the behavior potential of another persons.

उपर्युक्तपरिषाभिः अवगम्यते यत् शिक्षणे नैकाः क्रियाः अन्तर्भवन्ति। शिक्षणम् एका प्रक्रिया अस्ति। व्यवहारपरिवर्तनक्षमता शिक्षणे विद्यते। शिक्षणमेका सामाजिकी प्रक्रिया अस्ति यदुपरि शासनस्य, शैक्षिकोद्देश्यानाम्, मूल्यानाम्, संस्कृतेश्च प्रभावः परिलक्षितः भवति।

**1.1 शिक्षणस्य विशेषताः –**

शिक्षणस्य नैकाः विशेषताः परिलक्ष्यन्ते। तासु काश्चनात्र प्रदर्श्यन्ते–

1. शिक्षणे सर्वविधव्यवहाराः निहिताः सन्ति।
2. शिक्षणमेका कौशलात्मिकी प्रक्रिया अस्ति।
3. शिक्षणम् एका कला विज्ञानञ्च भवति।
4. शिक्षणं छात्रेषु क्रियाशीलतामानयति।
5. शिक्षणं छात्राणां मार्गदर्शनं करोति।

**1.3 शिक्षणसूत्राणि–**

शिक्षणस्य प्रभावशालितां सम्पादनाय नैकैः शिक्षाविद्भिः समये समये नैकाः संस्तुतयः संस्तुतीकृताः। क्रमेऽस्मिन् हरबार्ट स्पेन्सर– कॉमेनियसमहोदयाभ्यां स्वानुभवाधारेण निष्कर्षरूपेण कानिचित् शिक्षणसूत्राणि अपि प्रतिपादितानि। तद्यथा–

1. ज्ञातात् अज्ञातं प्रति।
2. सारल्यात् जटिलं प्रति।
3. स्थूलात् सूक्ष्मं प्रति।
4. पूर्णात् अंशं प्रति।
5. प्रत्यक्षात् परोक्षं प्रति।
6. विशिष्टात् सामान्यं प्रति।
7. अनिश्चितात् निश्चितं प्रति।
8. विश्लेषणात् संश्लेषणं प्रति।
9. मनोवैज्ञानिकक्रमात् तार्किकक्रमं प्रति।

**सम्प्रेषणस्य सम्प्रत्ययः –**

सर्वोऽपि लोकः परस्परसम्प्रेषणेन स्वाभिप्रायं प्रकटीकरोति। सम्प्रेषणभेदेन स्वकार्याणां सम्पादनाय व्यवहारः प्रचलति लोके। एतदर्थं औपचारिकप्रशिक्षणस्य काचिदपि आवश्यकता अपेक्षा वा दृष्टिगोचरा भवति। यद्यपि लोके सम्प्रेषणमत्यन्तं सामान्यं सहजं व्यवहारपरकञ्चास्ति तथापि विद्वद्भिः शिक्षाविज्ञैः अन्यैश्च महद्भिः सम्प्रेषणसम्प्रत्ययं स्पष्टयितुं विशदीकर्तुञ्च वैज्ञानिकरीत्या महान् प्रयत्नः कृतः। तत्बलेन सम्प्रेषणस्य नैकाः परिभाषाः दृष्टिपथं समायान्ति। तासु प्राधान्याः काश्चन परिभाषाः सम्प्रेषणमभिज्ञातुमत्र उल्लिख्यन्ते–

1- Edgar Dale's opinion –Communication is the sharing of ideas and feelings in a mood of mutuality.
2- John Dewey said- Communication is a process of sharing experience fully till it becomes a common possession. It modifies the disposition of both the parties who take post in it.
3- Chester Bernard's view- Communication is the means by which people are linked together in organization to achieve a common purpose.

निष्कर्षतः सम्प्रेषणं नाम एका तादृशी प्रक्रिया यस्यां परस्परसहमतमाध्यमेन विचाराणाम्, भावनानाम्, अनुभवानाम्, सूचनानाम्, मनोभावानाञ्च परस्परं विनिमयः भवति।

**सम्प्रेषणस्य विशेषताः –**

1. निरन्तरप्रक्रिया
2. सोद्देश्यप्रक्रिया
3. पारस्परिकी प्रक्रिया
4. ऐच्छिकी प्रक्रिया अथवा अनैच्छिकी प्रक्रिया।
5. प्रासङ्गिकी प्रक्रिया
6. सङ्ख्यात्मिका सादृश्यमूलकप्रक्रिया

**2.2 संप्रेषणप्रक्रिया–**

संप्रेषणमेका प्रक्रिया अस्ति। इयञ्च प्रक्रिया परस्परं विधीयते। या च उद्देश्यापूर्णा, प्रासङ्गिकी संबंधात्मिका च प्रक्रिया। संप्रेषणे सूचनाः प्रारम्भकात् प्राप्तकर्तारं प्रति सम्प्रेषिताः जायन्ते। अस्मिन् कर्मणि कानिचन चरणानि कार्यं कुर्वन्ति। तद्यथा

1. प्रेषकः
2. सन्देशः/सङ्केतः
3. कूटसंकेतनम्
4. माध्यमम्/मार्गः
5. प्राप्तकर्त्ता/अर्थकर्त्ता
6. अर्थनिष्कासनम्
7. पृष्ठपोषणम् अथवा अनुक्रियात्मिका सामग्री
8. सहायकाः अथवा बाधकतत्त्वानि

उपर्युक्तानि कानिचन चरणानि वर्तन्ते येषां माध्यमेन प्रक्रियेयं प्रवर्तिता जायते। प्रेषकः सूचनायाः आरम्भकः भवति। समीचीनतया कृतः आरम्भः स्वलक्ष्यप्राप्तौ हेतुः भवति। अत एव विद्वद्भिः प्रेषकस्यापि काश्चन विशेषताः उल्लिखिताः वर्तन्ते। तद्यथा–

1. आत्मविश्वासः
2. विषयवस्तुनः समुचितज्ञाता
3. नूतनसूचनाधारकः
4. मनसि स्पष्टाः धारणाः
5. संप्रेषणस्य व्यूहरचनानां ज्ञाता
6. जीवनेन सह सहसंबंधस्थायिकः
7. उत्तमः प्रेरकः
8. उच्चैः कथयिता
9. समुचितशब्दप्रयोक्ता
10. अशाब्दिकव्यवहारकुशलः

इत्त्थं सम्प्रेषकः अथवा प्रेषकः कुशलतया एव सम्प्रेषणे साफल्यं प्राप्तुं शक्नोति।

द्वितीयःप्रधानः अंशः सन्देशः इत्यङ्गीक्रियते। सन्देशः अथवा सङ्केतः शाब्दिकः अशाब्दिकः वा भवितुमर्हति। माध्यमम् अथवा मार्गः कस्यचित् सन्देशस्य गमनप्रकारं निरूपयति। साम्प्रतं तु नैकैः आधुनिकोपकरणैः सम्प्रेषणं भवितुमर्हति। आकाशवाणी, दूरदर्शनम्, चलचित्राणि, वार्तापत्राणि, पत्रिकाः, पुस्तकानि, सङ्गणकम् तथा अन्यानि नैकानि उपकरणानि भवन्ति। सम्प्रेषणे सूचनानां प्राप्तकर्ता अपि महत्त्वपूर्णः अस्ति। प्राप्तकर्तुः काश्चन विशेषताः अधोलिखिताः वर्तन्ते–

1. सूचनाप्राप्तकर्तुः इच्छा।

2. सूचनाप्राप्तकरणवेलायाम् एकाग्रता सतर्कता च।
3. सन्देशप्राप्त्यर्थं यत्नः।
4. अवगन्तुं योग्यता।
5. समीचीना भाषा। इत्यादि।

सम्प्रेषणे सन्देशप्राप्तेः अनन्तरं प्राप्तकर्त्रा या प्रतिपुष्टिः प्रदीयते सा अत्यन्तं महत्त्वपूर्णा। तत्र हि कारणं प्रभावशीलता। रॉनट्रीमहोदयेन विषयेऽस्मिन् स्पष्टा प्रतिपत्तिः प्रदर्शिता विद्यते–True communication is achieved through potent and insistent feedback.

समानतया सम्प्रेषणे आन्तरिक–बाह्यभेदेन बाधकतत्त्वानामपि महत्त्वं वरीवर्ति। तत्र च कारणमिदमेव यत् समीचीनतया प्रदत्तः सन्देशः अपि बाधकतत्त्वानाम् उपस्थित्या स्वलक्ष्यं प्रति न गच्छति। येन सम्प्रेषणं तदीया प्रक्रिया च पूर्णतया बाधिता भवति। अतः सम्प्रेषणं केवलम् एकाङ्गीरूपेण न भवति प्रत्युत प्रक्रियायामस्यां नैकाः अंशाः महत्त्वपूर्णाः भवन्ति।

**2.3 प्रभावशालिसम्प्रेषणस्य सिद्धान्ताः –**

सम्प्रेषणस्य आधारभूताः केचन व्यावहारिकाः सिद्धान्ताः वर्तन्ते। यैः सम्प्रेषणस्य प्रभावशालिता सुनिश्चिता भवति। तादृशाः केचन सिद्धान्ताः अत्र निर्दिश्यन्ते–

1. योग्यतायाः सिद्धान्तः
2. विषयवस्तुनः उपयुक्ततायाः सिद्धान्तः
3. विषयवस्तुनः विभाजनस्य सिद्धान्तः
4. सहयोगस्य सिद्धान्तः
5. परस्परविवेकितायाः सिद्धान्तः
6. उपयुक्तदृष्टिकोणस्य सिद्धान्तः
7. अवधारणायाः स्पष्टता
8. तत्परतायाः अभिप्रेषयाः सिद्धान्तः
9. सहानुभूतेः सिद्धान्तः
10. समादरस्य सिद्धान्तः

यदि सम्प्रेषकः योग्यः नास्ति, विषयवस्तुनः ज्ञाता नास्ति, न च विद्यन्ते उपर्युक्ताः बहवः अंशाः, समानतया प्राप्तकर्तरि एते गुणाः न सन्ति तर्हि सम्प्रेषणं पूर्णतया बाधितं जायते। किं बहुना भाषा, श्रवणयोग्यता, नेत्रसम्पर्कः, समुचितं वातावरणम्, प्रतिपुष्टिः, पुनर्बलनमित्यादयः नैके अवान्तरविषयाः वर्तन्ते येषामाधारेण एव सम्प्रेषणं सुनिश्चितं जायते। अतः उपर्युक्तानां व्यवहारपरकसिद्धान्तानामेतेषामाधारेण सम्प्रेषणं प्रभावपूर्णम्, उद्देश्यप्रापकञ्च भवति।

**2.4 सम्प्रेषणस्य बाधकतत्त्वानि–**

सम्प्रेषणं बाधकतत्त्वैः स्वोद्देश्यपूर्णतां न प्राप्नोति। सम्प्रेषणस्य बाधकतायां नैकानि कारणानि भवितुमर्हन्ति–

1. कोलाहलः
2. भाषा

3. मानसिकं स्वास्थ्यम्।
4. बुद्धिः
5. मानसिकस्तरः
6. विकर्षणम्
7. आचार–व्यवहारः
8. विश्वासः
9. मूल्यानामभावः
10. श्रेष्ठतायाः भावना
11. स्वार्थः।
12. अत्यधिकाशाब्दिकर्गयव्यक्तिः इत्यादि।

सम्प्रेषणे विद्यमानानि बाधकतत्त्वानि विषयस्य ग्रहणे प्रवाहे अवगमने च नितरां समस्यां बाधकताञ्च उत्पाद्य प्रक्रियामिमां पूर्णतया नष्टीकुर्वन्ति। अतः इदमवश्यम् अवधेयं यत् सम्प्रेषणप्रक्रिया कथमपि बाधिता न भवेत्।

**3. शिक्षणे सम्प्रेषणस्य महत्त्वम्–**

शिक्षणाधिगमप्रक्रियायां शिक्षणमाध्यमेन अध्यापकः विषयस्य सम्प्रेषकः भवति, तद्विपरीततया छात्रः सम्प्रेषितस्य विषयस्य ग्राहकः। अतः सम्प्रेषणस्य या अवधारणा अस्ति सा पूर्णतया शिक्षणे यथावत् दरीदृश्यते। यथा च सम्प्रेषणस्य प्रक्रिया तद्वदेव शिक्षणस्यापि। शिक्षणे यथा नैकाः समस्याः अवगम्यन्ते, तासां समस्यानामपि मूले सम्प्रेषणमेव। अध्यापकस्य भाषा, व्युत्पन्नता, विषयप्रस्तुतिः, व्यवहारः, सामाजिकमान्यता, उच्चारणं, स्वास्थ्यं, मानसिकस्तरः, अभिप्रेरणा, तत्परता, परस्परसहयोगः, सहानुभूतिः, दृष्टिकोणम् इत्यादयः नैके विषयाः शिक्षणस्य महत्त्वसंस्थापने महत्त्वपूर्णाः। छात्रः अध्यापकस्य केवलं वचनं श्रुत्वा एव प्रवर्तितः न भवति। प्रत्युत अध्यापकस्य सम्पूर्णव्यक्तित्वं वचनत्वेन परिवर्तितं जायते। तादृशः अध्यापकः शास्त्रानुसारेण 'आप्ता' इत्यभिधीयते। स च प्रामाणिको भूत्वा छात्रेभ्यः सम्प्रेषणे समर्थः भवति। लोकेऽपि दृष्टिपथमायाति यत् जनाः तादृशमेव व्यक्तिविशेषमनुकुर्वन्ति यः श्रेष्ठः प्रतिष्ठासम्पन्नश्च लक्ष्मीक्रियते। छात्राणामपि बुद्धौ शिक्षकस्य आकृतिः किञ्चित् विशिष्टा एव। सामाजेऽपि शिक्षकाः आचारवान् इति मन्यते। तत्रापि संस्कृतशिक्षकः विशिष्टः। मूल्यानामाकरः शिक्षकः इति धारणा। क्रमशः इदं सर्वमपि तत्त्वं सम्प्रेषणजनकमेव।

**3.1 आधुनिकोपकरणैः शिक्षणे सम्प्रेषणम्–**

शिक्षणे क्रमशः प्रविधेः अवलम्बनं जायमानं वर्तते। प्रविधौ यन्त्रांशस्य तन्त्रांशस्य च उपयोगः शिक्षणमितोऽपि प्रभावि करोति। प्रविधेः कारणतः साम्प्रतं बृहती कक्ष्या यत्र बहुसङ्ख्याकाः छात्राः वर्तन्ते तत्रापि सम्प्रेषणमाध्यमेन शिक्षणं जायमानं वर्तते। एतस्मात् कारणादेव कक्ष्याः अपि आयोजिताः। भवन्ति। छात्रेभ्यः विषयस्य ज्ञानं निर्बाधरूपेण जायमानं दृश्यते। यदि वयं सूक्ष्मतया विचारयामः चेत् अस्माभिः ज्ञातुं शक्यते यत् उपकरणानां बलेन सम्प्रेषणमेव प्रभावि जातं वर्तते। यस्माच्च शिक्षणं ततश्च अधिगमः इति फलितार्थः। अत्र च कश्चन क्रमः अपि लक्षितः भवति। तद्यथा–

उपकरणानि (प्रविधिः) – सम्प्रेषणम् – शिक्षणम्– अधिगमः इति। सूचना– सम्प्रेषणप्रविधिः विशिष्य उपकरणाश्रिता एव। अत एव कक्ष्याशिक्षणेऽपि बहुमाध्यमानां प्रयोगः शिक्षणस्य गुणवतासम्बर्धने हेतुः वर्तते। सङ्गणकादिभिः तु बहुकालात् शिक्षणे स्वीयोपयोगिता प्रतिष्ठापिता वर्तते एव। अतः निष्कर्षतः इदं हि आयाति यत् आधुनिकैः उपकरणैः

जनसमान्यक्षेत्रे यथा सम्प्रेषणं विहितं, तद्वदेव एतैः शिक्षणेऽपि सम्प्रेषणं पोषितम्। यस्मात् शिक्षणाधिगमप्रक्रिया इतोऽपि बलवत्तरा सञ्जाता। छात्राणाञ्च विषयस्यभावगाहने महत्सौकर्यं समागतं वर्तते।

**3.2 उत्तमसम्प्रेषकः अध्यापकः –**

Effectiveness in the classroom communication to a great extent depends upon strength and qualities of the sender or source i.e. communicator/teacher/encoder. इति डा. जे. एस्. वालियामहोदस्य वचनं स्पष्टं प्रमाणयति यत् सम्प्रेषणकस्य सामर्थ्यभेव कक्ष्यायां प्रभावशालितां सम्पादयति। एतदतिरिच्यापि केचन प्रमुखः गुणाः वर्तन्ते ये अध्यापके समीचीनाय सम्प्रेषणाय अवश्यमेव भवेयुः–

1. अध्यापकस्य विषयवस्तुनः उपरि समीचीनः अधिकारः।
2. ज्ञानस्य लालसा।
3. भाषायाः समुचितोच्चारणम्।
4. कक्ष्याप्रबन्धने नियन्त्रणे च कार्यकुशलता।
5. शिक्षणस्य समुचिता कार्यप्रणाली।
6. उत्तमं शारीरिकं मानसिकञ्च स्वास्थ्यम्।
7. शिक्षणवृतिं प्रति समादरः।
8. छात्रान् प्रति स्नेहभावना।
9. उत्तमः व्यवहारः।
10. मनोवैज्ञानिकदृष्टिकोणम्।

इत्त्थं नैके गुणाः शिक्षकमुत्तमसम्प्रेषकत्वेन अपेक्षिताः भवन्ति।

**उपसंहारः –**

शिक्षणाधिगमप्रक्रियायाः सफलतायै प्रभावशालि सम्प्रेषणमत्यन्तमावश्यकम्। कक्ष्याध्यापकस्य इदं नितान्तमुद्देश्यं भवेत् यत् कथं सः उत्तमतया सम्प्रेषणं कर्तुं शक्नुयात्। अध्यापकत्वेन इदं हि प्राधान्येनावगन्तव्यं भवति यत् यावत् पर्यन्तं सः उत्तमतया शिक्षणे विद्यमानानां सम्प्रेषणं नैव करिष्यति तावत् पर्यन्तं छात्राणां विषयावबोधः नैव भविश्यति। फलतः तदीयः उत्तमानाम् आधुनिकानां साधनानामुपयोगं विधाय शिक्षणं कर्तुं विचारः भवेत्।

सम्प्रेषणस्य प्रक्रिया सूक्ष्मतया शिक्षणस्य प्रक्रियैव प्रतिभासते। सम्प्रेषणप्रक्रियायां यथा सम्प्रेषकः प्राप्तकर्त्ता च भवतः तथैव शिक्षणाधिगमप्रक्रियायां शिक्षकः छात्रश्च वर्तेते। सम्प्रेषणे यथा सम्प्रेषकः प्रधानः तद्वदेव अपरत्र शिक्षकः। सम्प्रेषके च ये गुणाः अत्यन्तमावश्यकाः त एव शिक्षकेऽपि। सन्देशस्य प्राप्तकर्तरि च ये गुणाः, याः विशेषताश्च भवेयुः तादृशी एव योग्यता छात्रेऽपि इत्यत्र नास्ति संशीतिः। सम्प्रेषणे उपकरणानां महत्त्वं विद्यते। माध्यमबलेन सम्प्रेषणं प्रभावितञ्च जायते। शिक्षणेऽपि शैक्षिकप्रविधिबलेन शिक्षणस्य गुणवत्ता क्रमशः वर्धिता परिलक्ष्यते। सम्प्रेषणे वातावरणम् अत्यन्तमुपकरोति। कदाचित्–बाह्यबाधकरूपेण बाधामपि जनयति। शिक्षणेऽपि बाह्यपरिस्थितयः सहायतां बाधां च जनयन्ति। कक्ष्यायां आन्तरिकं बाह्यञ्च वातावरणं यावता मात्रया शान्तं, उत्साहवर्धकञ्च भविष्यतः तावता मात्रया अधिगमः भविष्यति।

आधुनिकपरिस्थितौ तु सम्प्रेषणमेव प्रधानम्। उत्तमसम्प्रेषणाभावे विशेषबोधः तु नैव भवेत् एव प्रत्युत सामान्यबोधायापि कष्टं स्यात्। शिक्षणे सम्प्रेषणस्य महत्त्वमङ्गीकृतवद्भिः विषयविशेषज्ञैः नूनमेव क्षेत्रेऽस्मिन् शिक्षकस्य प्रयत्नः विधेयः इति प्रत्यपादि। यथाशक्ति आधुनिकानां माध्यमनानामुपकरणानाञ्च प्रयोगं विधाय शिक्षणे उत्तमतया सम्प्रेषणं विधेयम्। कालिदाससदृशैः अपि इदम् अङ्गीकृतमेव। प्रतिपुष्टेः महत्त्वमपि सर्वत्र दरीदृश्यते। तत्समानतया अत्रापि उत्तमसम्प्रेषणसंस्थापने प्रतिपुष्टेः महत्त्वं वरीवर्ति। अतः कारणात् शिक्षणे सम्प्रेषणं सुतरां विशिष्टम् असाधारणञ्च स्थानमलङ्करोति।

**सन्दर्भग्रन्थसूची–**


1. भूषण, शैलेन्द्र एवं कुमार अनिल (2003). शैक्षिक तकनीकी. आगराः विनोद पुस्तक मन्दिर. पृष्ठ–283–295
2. मंगल, एस.के. एवं मंगल, शुभ्रा शैक्षिक तकनीक. नई दिल्लीः आर्य बुक डिपो. पृष्ठ– 246–268
3. वालिया, जे.एस. (2014). शिक्षा तकनीकी. जालन्धरः अहम् पाल पब्लिशर्स. पृष्ठ – 236–258
4. हुड्डा, निवेदिता (2011). सूचना संचार एवं शैक्षिक तकनीकी. नई दिल्लीः जगदम्बा पब्लिशिंग कम्पनी. पृष्ठ 237–291
5. ओबराय, एस.जी. (2012). सूचना सम्प्रेषण और शैक्षिक तकनीकी. नई दिल्लीः आर्य बुक डिपो. पृष्ठ– 01–61

6.Mangal, S.K. (2001). Foundation of Education Technology. Ludhiana:Tandon Publications. p.475-498.